स्वाहाग्नये वरुणाय स्वाहेन्द्राय मरुद्भ्यः स्वाहा देवेभ्यो हविः ।

प्र नव्यसा सहसः सूनुम् अच्छा यज्ञेन गातुम् अव इच्छमानः ।
वृश्चद्वनं कृष्णयामं रुशन्तं वीती होतारं दिव्यं जिगाति ॥ ६.००६.०१ ॥
स श्वितानस् तन्यतू रोचनस्था अजरेभिर् नानदद्भिर् यविष्ठः ।
यः पावकः पुरुतमः पुरूणि पृथून्य् अग्निर् अनुयाति भवन् ॥ ६.००६.०२ ॥
वि ते विष्वग् वातजूतासो अग्ने भामासः शुचे शुचयश् चरन्ति ।
तुविम्रक्षासो दिव्या नवग्वा वना वनन्ति धृषता रुजन्तः ॥ ६.००६.०३ ॥
ये ते शुक्रासः शुचयः शुचिष्मः क्षां वपन्ति विषितासो अश्वाः ।
अध भ्रमस् त उर्विया वि भाति यातयमानो अधि सानु पृश्नेः ॥ ६.००६.०४ ॥
अध जिह्वा पापतीति प्र वृष्णो गोषुयुधो नाशनिः सृजाना ।
शूरस्येव प्रसितिः क्षातिर् अग्नेर् दुर्वर्तुर् भीमो दयते वनानि ॥ ६.००६.०५ ॥
आ भानुना पार्थिवानि ज्रयांसि महस् तोदस्य धृषता ततन्थ ।
स बाधस्वाप भया सहोभि स्पृधो वनुष्यन् वनुषो नि जूर्व ॥ ६.००६.०६ ॥
स चित्र चित्रं चितयन्तम् अस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।
चन्द्रं रयिम् पुरुवीरम् बृहन्तं चन्द्र चन्द्राभिर् गृणते युवस्व ॥ ६.००६.०७ ॥

प्र वो देवं चित् सहसानम् अग्निम् अश्वं न वाजिन हिषे नमोभिः ।
भवा नो दूतो अध्वरस्य विद्वान् त्मना देवेषु विविदे मितद्रुः ॥ ७.००७.०१ ॥
आ याह्य अग्ने पथ्या अनु स्वा मन्द्रो देवानां सख्यं जुषाणः ।
आ सानु शुष्मैर् नदयन् पृथिव्या जम्भेभिर् विश्वम् उशधग् वनानि ॥ ७.००७.०२ ॥
प्राचीनो यज्ञः सुधितं हि बर्हिः प्रीणीते अग्निर् ईळितो न होता ।
आ मातरा विश्ववारे हुवानो यतो यविष्ठ जज्ञिषे सुशेवः ॥ ७.००७.०३ ॥
सद्यो अध्वरे रथिरं जनन्त मानुषासो विचेतसो य एषाम् ।
विशाम् अधायि विश्पतिर् दुरोणे ऽग्निर् मन्द्रो मधुवचा ऋतावा ॥ ७.००७.०४ ॥
असादि वृतो वह्निर् आजगन्वान् अग्निर् ब्रह्मा नृषदने विधर्ता ।
द्यौश् च यम् पृथिवी वावृधाते आ यं होता यजति विश्ववारम् ॥ ७.००७.०५ ॥
एते द्युम्नेभिर् विश्वम् आतिरन्त मन्त्रं ये वारं नर्या अतक्षन् ।
प्र ये विशस् तिरन्त श्रोषमाणा आ ये मे अस्य दीधयन्न् ऋतस्य ॥ ७.००७.०६ ॥
नू त्वाम् अग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम् ।
इषं स्तोतृभ्यो मघवद्भ्य आनड् युयम् पात स्वस्तिभिः सदा नः ॥ ७.००७.०७ ॥

आ नो विश्वाभिर् ऊतिभिर् अश्विना गच्छतं युवम् ।
दस्रा हिरण्यवर्तनी पिबतं सोम्यम् मधु ॥ ८.००८.०१ ॥
आ नूनं यातम् अश्विना रथेन सूर्यत्वचा ।
भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥ ८.००८.०२ ॥
आ यातं नहुषस् पर्य् आन्तरिक्षात् सुवृक्तिभिः ।
पिबाथो अश्विना मधु कण्वानां सवने सुतम् ॥ ८.००८.०३ ॥
आ नो यातं दिवस् पर्य् आन्तरिक्षाद् अधप्रिया ।
पुत्रः कण्वस्य वाम् इह सुषाव सोम्यम् मधु ॥ ८.००८.०४ ॥